कृतानां पर्यग्निकरणांतांगमिति विधानेन तत्रैव समाप्तिरारणवत् द्वितीयादिषु अन्ये न्य उक्षाण: पं
चमे वर्षे सुत्यासु अन्येषामुक्षणामालंभ इति। तत्र त्रीस्त्रीनित्यनेन ब्रह्म सामालंभ वाक्यवत्तेषामेव
लंभो लक्षमात्र विधौ लाघवं। वचनात्पर्यग्निकृतानामपि तेषां पुन: पर्यग्निकरणं क्रियते। उत्सर्गेव

चतुर्थवर्षेषु प्रतिवर्षं सप्तदशयागां तराण्यपूर्वांतराणि च। नी १

अप्रसूता: ४
आरभ्य
[illegible]: ५

चनास्ति चालंभो लकर्षाद्वि [illegible] कृतवतो
प्राप्तस्योत्सर्गस्यानुवाद इति प्राप्ते ब्रूमः। स्यादेवं यदि त्रीस्त्री नित्यनेनालंभो लकर्षः शक्यो विधातुंन
त्वेवमस्ति। गुणवाक्यत्वेसति त्रीस्त्रो निति चान्वहमिति चानेकार्थ विधाने वाक्यभेदापत्तेः। तथा पंचेति
चोत्तमेहनीति चार्थभेदो दर्शयितव्यः। तस्मादिदं तावत्संख्याकाल विशिष्टापूर्व विधानं एवं चाविहि
ते सत्यालंभोत्कर्षेप्राजापत्यन्यायासंभवात्तदंतागरीति विधानेनारण्यन्यायेन प्रथमस्य बोपक्रांतानां
मुख्यायागानां त्रिवत्सानामिव तन्त्रैवसमाप्ति र्द्वितीयादि षु पिवर्षे ष्वन्यएवत्रीपशुयागाः पुं पशुया
गास्युः एवं प्रतिसंवत्सरं देवतानुषंगेणचतुस्त्रिंशत्क्रमीणि पंचमेवान्ये षामेवोक्षणामालंभः॥१२॥
दशपेयेक्रयप्रतिकर्षात्प्रतिकर्षस्ततःप्राचां तस्मात्समानतंत्रं स्यात्॥ राजसूयेभिषेचनीयोनाम सोमयागः ततः संस्रपाद्यवीषितः पुनर्दशपेयः सोमयागः। तावि मावभिषेचनीयदशपेयौ समानतंत्रौ भिन्नतंत्रौ
वेति संदेहे सहस्तोमं क्रीणात्यभिषेचनीयस्य दशपेयस्य चेति। वचनादभिषेचनीयसोमक्रयकाले दशपेयक्रयः प्रतिकृष्यमाणः प्राचोपि पदार्थान्प्रतिकर्षति तदंतमपकर्षेत्स्यादिति न्यायात्। तस्मात्सहोपक्रमितव्यावभिषेचनीयदशपेयौ यथोपक्रमं वसमापयितव्यावितिसमानतंत्रौ। नेवं
उपसंवादस्माज्जमिहक्रीणातिनोच्यतेन त्वगभूतः क्रयः। क्रीणातेर्नमुख्यावाच्यः। मूल्यंदत्वापरकी

प्रतिकृष्यते। सच ३ ग्रा४ नचसौ

राम ६

यस्य स्वीकरणं क्रयः। न चोपसंवादस्यैवंरूपत्वमस्ति। यद्यप्येवं तथापि गोणपारत्यात स्यैवेदं साहित्य
मुच्यते वचनांतरानुगुणपात्। दशापेये हि श्रूयते स चो दीक्षयति सद्यः सोमं क्रीणातीति। तथा प्रि षव
नीये वभ्रथदर्शनमत्यंतानुपपन्नमेकतंत्रत्वे स्यात्। तस्माद् गभ्रूतक्रयापकर्षाभावान्न तदंतापकर्ष
इति न सहोपक्रमत्वं। कालन्त्रे दानुसिन्नोपक्रमावेव संतौ छिन्नतंत्रावेवैतौ ॥१३॥ निष्कासस्यावभृथे
तदेकदेशलात्स्रुवस्यदानविप्रकर्षः स्यात्। वरुणप्रघासेषु वारुण्या मिक्षा मारुत्या मिक्षेति श्र
तौ। तत्र पुनः श्रूयते वारुण्या निष्कासेन तुषैश्चावभृथं यंतीति। तत्र संशयः। किं प्रधानस्यामिक्षा
यागस्यायं प्रचारविप्रकर्षः पशोरिव वपाहृदयादिभिः प्रातःसवनतृतीयसवनयोरुत निष्कासद्रव्या
[illegible] भृथधर्मकं कर्मांतरं विधीयत इति X संश
कमव [illegible]
यं प्रतिपत्तिः। अथामिक्षा निष्का X ति। नत्र कृत्स्नस्यामिक्षाद्रव्यस्य प्रकृतयागशेषत्वात्तदेकदेशेन
प्रतिपत्तिः। अथामिक्षा निष्का X ति। नत्र कृत्स्नस्यामिक्षाद्रव्यस्य प्रकृतयागशेषत्वात्तदेकदेशेन
स्याएवदेवतायै वरुणाय दीयमानेन कर्मांतरं युक्तं। अवभृथशब्दस्तु देवतासामान्याद् गौणोऽनुवा
दः। अवभृथोऽपि हि वारुणः। न चानुवादे गौणत्वं दोषः। सिद्धांते तु तद्धर्मकं कर्मांतरविधौ विधावेव गौ
णत्वं स्यात्तच्चायुक्तं। तस्मात्स्वैवायमभ्यास इति न स्विष्टकृदादेः पुनः करणं। नैवं। अवभृथशब्द
नर्थक्यात्। न चार्थवत्वे संभवत्यानर्थक्यं युक्तं। तस्मादवभृथधर्मकं कर्मांतरविधानं। न तु प्रयाजशेषा

ननु गुणविभक्तिप्रधानविभक्तिभ्यामुपयोगद्रव्यसंस्कारगरीयस्त्वेऽवधारणस्यापि प्रयाजशेषप्रतिपत्तितानस्या
दित्याशंक्य वैषम्यमाह न चेति। तत्र त्वसिद्धान्ते दृष्टार्थत्वाद्गाम्भीर्यं इह तु न त्वास्तीत्यर्थः॥११

निधारणवदाविक्षाशेषस्य प्रतिपत्त्यर्थं। सत्यं कर्मान्तरं न तु प्रतिपत्तिः। अवभृथशब्दविरोधात्। अ
वभृथे हि द्रव्यं गुणः। कर्म प्रधानं। ततः इह तु विपर्ययात्तद्भावानुपपत्तिः। तेन यस्यैवावभृथश
ब्दस्य प्रसादात् कर्मान्तरमाश्रितं तेनैव प्रतिपत्त्यर्थतानिराकरणेनार्थकर्मता सिध्यति। वचनाच्चा
न्यदीयस्यापि द्रव्यस्यैकदेशोऽन्यत्र विनियुज्यमानो न दुष्यति॥१४॥ उदयनीये च तद्वत्। ज्योतिष्टो
मे प्रायणीयश्चरुरुदयनीयश्च। तत्राम्नायते प्रायणीयस्य निष्कासे उदयनीयमनु निर्वपतीति। तत्र
संशयः। किं प्रायणीयनिष्कासद्रव्यकमुदयनीयधर्मकं कर्मान्तरं विधीयते किं वा प्रायणीयनिष्का
सस्योदयनीयनिर्वापसंयोगः प्रतिपत्तिः। उत प्रायणीयनिष्कासे निर्वापे उदयनीयस्य संस्कार इ
ति। पूर्ववत्तद्धर्मकं कर्मविधिः। मुख्यस्यैव तूदयनीयस्येह प्रकृतत्वान्न प्रकरणान्तरन्यायेन तद्धर्मकं
कर्मविधिः। तस्मात्प्रायणीयनिष्कासस्य कृतार्थस्येयं प्रतिपत्तिरुदयनीयनिर्वापसंयोगः। नै
तदेवं। निष्कासस्य हि सतः सम्पा गुणत्वान्नावकाश्यते। द्वितीयया प्रधानत्वमितरस्य स्फुटं कृतं। उदय
नीयहविश्च निरूप्यमाणं नाव्युपयोगित्वात्सुतरां संस्कारार्हं। न च निष्कासस्य प्रयाजशेषवदुदय
नीयसंयोगात् किंचिद्दृष्टमस्ति। तस्माच्छ्रुत्यानुगुण्यादुदयनीयहविःसंस्कारार्थं प्रायणीयनिष्कासे
निर्वापः॥१५॥ ॥इति शास्त्रदीपिकायामेकादशाध्यायस्य द्वितीयः पादः॥ ॥अङ्गानां मुख्यकाल

10/1

तत्र ६ नद्द

एका० २०

क६

नित्यसौ संकल्प्यः प्रयोगांगभूतः निमित्तानां कामानां च तत्प्रयुक्तकर्मप्रयोगविधीनां तदा प्रवृत्तेः । सर्वकर्मसाधारणत्वाच्च नायं दर्शपूर्णमासारंभ
प्रतिज्ञात्वेन व्यपदेष्टुं यदि चैवंविधमध्यवसायमंगीकृत्यारंभणीयासकृदनुष्ठीयेत ततोऽस्य प्रकृतिविकृतिसाधारणत्वाद्विकृतिषु न स्याद्
यथाकृतं चेद्व्यास्यात् तत्र द्वादशाधिकरणविरोधः । किं च । यद्यपि नित्याः प्रयोगा निश्चितयावज्जीवसंकल्प्येरन् काम्यास्तु कामोत्पत्तेरनिश्च
यात्तत्कथं चित्संकल्पिता इति तेषु प्रतिप्रयोगं स्यादित्याशयः । यावज्जीविके प्रयोगपक्षे तु चतुर्थोऽध्यवसायो गं स्यात् सतु प्रयोगो या
वज्जीवाधिकरणे निरस्त इत्युक्तं न हीत्यनेन । ननु दर्शपूर्णमासनिमित्तानां यावज्जीविकानां नित्यत्वात्तन्निमित्तकाः प्रयोगा अपि क
र्तव्यतया निश्चिता इति तद्विषयोऽध्यवसायः साधारणः संभवत्येवेत्यत आह यद्यपीति । यथाहि पुत्रोत्तरजन्मभाविषयत्वान्न वेत्ति निश्चि
तं एवं भाविपर्यवसानं जीवनमप्यनिश्चितं मरणसंभवादित्यर्थः ॥ अतो यदि निरूढ्यन्ते पूर्वपक्षो न निराकृतः स्यादित्याह तस्मादिति । भा
ष्यकृन्मतेनाधिकरणमारचयति तस्मादिति । तन्मते तु न पूर्ववत् मुख्यसंशयः तत्र मा वृत्तिर्वर्तिसकृत्त्वरूपसिद्धांतकोटितोऽपि
सर्वोद्देशेन सकृदनुष्ठानात्मकतन्त्राभावात्तथा मुख्यसंशयहेतुसंशयोऽपि न पूर्ववत् किमियं प्रयाजवत्साक्षाद्दर्शपूर्णमासांगं
उतारंभद्वारेति किं तु सकृदावृत्तिमात्रविषयो मुख्यसंशयः तद्धेतुसंशयश्च आरंभद्वारत्वमंगीकृत्य किमारंभशब्दो दर्शपू
र्णमासाद्युपपदार्थमग्न्यन्वाधानाख्यमभिधत्ते तत एव तदंगं उत दर्शपूर्णमासयोर्यदुपक्रमं पूर्वस्य पुरुषस्याद्यप्रवर्त्तनं
तद्वाच्यारंभशब्दः तत एवं तत्कुर्वतः पुंसो गंतृत्वाहु किमिति । अग्न्यन्वाधानग्रहणं ततोऽपि प्रथमस्य प्रणयनस्योपल
क्षणं अत्र यद्यपि पुरुषसंस्कारकत्वाभावेऽपि सिद्धांतः स्थितस्तथैव तथापि उपसर्जनतयोक्तस्यारंभस्य मा भूत्त्वेनान्वयायो
गात्तदुपसर्जनकः पुमानेव भाव्यो भवतीति परमार्थिकसिद्धांतविवक्षया पुरुषांगतोक्ता । ननूक्तमुपसर्जनतयोक्तस्या
न्वाधानाख्यारंभस्य भाव्यत्वेनान्वयः पूर्वपक्ष्यतदाशंकामपनुदन् पूर्वपक्षमाह तत्रेति । अप्रवृत्तस्य कर्तुरभिसाधयपदव्याख्या
॥ यद्यपि शानचा कर्तोक्तस्तथापि तादर्थ्ये फलकल्पना [illegible] तदाप्यारंभशब्दोऽन्वाधानप्रयोगात्तद्वाचीति तद
गं पुरुषवचनस्त्वनुवादः तदंगं हि तत्कर्त्री क्रियते नान्येनेति । अन्वाधाने च प्रतिप्रयोगं स्थितं स्यादंगमारंभणीयाम
भ्यावर्तयतीत्यर्थः ॥ ॥

सिद्धांतमाहनेति· यथाहितिः प्रथमामन्वाहेति प्रथमादिशब्दस्य च्छान्नवाचीत प्रयोगादनुक्रमचिलक्षण यावर्त्तते स्वमारंभशब्दो प्या
द्यप्रवृत्तिवाची· तद्विषयत्वात्तु अन्वाधानादावाद्यपदार्थे लक्षण यावर्त्तते· अन्वाधानवाचित्वेष्व्यग्निहोत्रज्योतिष्टोमादे
न राद्यपदार्थे प्रयुज्येत दर्शितश्च ज्योतिष्टोमप्रथमपदार्थस्य तदीक्षणीयायामारंभशब्द प्रयोगो दर्शमादेवताश्चैव यद्वा चार
भ्यतइति दीक्षणीयावाक्यशेषोः स्येवेष्ठ्लोके व्याचष्टे प्रथमेति· एवं दर्शपूर्णमासयोः प्रवृत्तस्य कर्तुराद्ये प्रवर्त्तनमारंभइस्कोले
तादर्थ्यं विसति तस्यैक चादारंभणीयानाइतिसिद्धावपि उपसर्जनत्वात्तादर्थ्यं न संभवतीत्याशयेन द्वितीयश्लोकाद्यार्थे
व्याचष्टे दर्शेति· न च कर्तृसंस्कारकत्वोत्त्यारंभांगतानास्तीति भ्रमितव्यं साध्यारंभविशिष्टं हि पाव्यं रची कुर्वंता धिधि
नैव विधेयस्य स्वर्गाद्यर्थत्वमिवारंभार्थत्वेनाक्षिप्यते· किमुत यदा लिङ्गस्यैव तादर्थ्यं· इयांस्तु विशेषः आरंभणीयारंभकर्तुः
भोग्युपयोगस्य सं[redacted]स्कारिकेति केचिंगत्वेनारंभांगत्वं निर्वाह्यते· स्वर्गकामस्य तु भोग्युपयोगत्वाभावात्तत्संस्कारको
यागइति विपरीतं भवति स्वर्गांगतया पुरुषांगत्वानिर्वाहः इत्येवं द्वितीयश्लोको कोत्तरार्द्धं व्याचष्टे आरंभेति· आरंभांगत्वं श्रो
तं वदत्पुरुषांगत्वं न श्रौतं आरंभस्य समानपदे षष्ठीचतुर्थीद्वितीयाश्रुतीनामभावादिति सूचितं· न चारंभस्य स्वरूपार्थत्ता
संभवति विनापि तयारंभस्वरूपप्रसिद्धेः तेनारभ्यमाणपूर्वसाधनत्वेन रूपेणारंभांगमिष्टं तेन पुरुषार्थत्वेपि न फल
10 कल्पनेत्याह अतइति· भवत्वेवमारंभांगं पुरुषांगं च प्रकृते तु किमायातमत आह न चेति· सोमेन यक्ष्यमाणइति वद्व
व्यर्थे विहितत्वाद्भाविषय दारंभकर्तृसंस्कारकत्वावगमाच्चारंभात्सर्वकार्येति प्रयोगबहिर्भूतत्वं सर्वप्रयोगार्थं
2 प्रयोगपृथगर्थे सकृदेव कर्त्तव्यत्वसर्थः ननु यद्यपि लिङ्गबलादियं कृत्स्नप्रयोगात्प्रागेव कार्या तथापि तदंगत्वाद्यस्मिन्प्रवर्ति
प्रधानं क्रियते तस्मिन्नेव कार्या· प्रधानकालत्वादंगानां तच्च तत्कालस्यैव प्रयोगस्योपकुर्यात् नान्येषां वैरोषग्रहणा
त्· अतः प्रयोगांतरेष्वपि पुनः कर्त्तव्या· यदि [illegible] नान्यमुपकरोतीति तेनास्यापि पुनः कार्यास्यात्

तत्र द्वादशाधिकरणविरोधस्याशयेन शंकते नन्विति· समाधत्ते सकृदिति· दर्शपूर्णमासशब्दश्रवणाद्दर्शपूर्ण १०

त्वाद्वचनादन्यकालत्वं। प्रधानस्य समदेशत्वं प्रधानकालत्वं चांगानामुक्तं। यत्र चाङ्गत्यांगस्य भिन्नदे
शकालत्वं वचनेनैवोक्तं तत्र तथा भवतीति सुहृद्भूत्वोक्तवान्नात्र निराकार्यमस्ति॥१॥ द्रव्यस्याकर्म
कालनिष्पत्तेः प्रयोगः सर्वार्थः स्यात्स्वकालत्वात्॥ वसंते ब्राह्मणोऽग्निमादधीतेत्यनारभ्याधीतमप्या
धानमग्निहोत्रादीनामंगमिति कृत्वा चिंत्यते। किमंगं सदाधानं प्रतिकर्म प्रति प्रयोगं च भेदेन कर्तव्यमुत
सर्वकर्मणां सर्वप्रयोगाणां च तंत्रेणेति। तत्र प्रयाजादिवदंगत्वाद्वृत्तिः स्यादिति प्राप्ते उच्यते। आनंतर्याद्वि दा५
शेषस्य [illegible] गृह्यते तेनानंतं न्ना। स्वकालत्वाच्च तंत्रत्वं विशेषाग्रहणाद्भवेत्। आनंतर्याद्विशेष
स्येत्याधानसमयस्य सो। न ह्यादेः कर्मणः प्रारंभे मध्ये वा प्रयुज्यते येन तदपवर्गे पवृज्येत। वाचनिको ह्यस्य
वसंतादिः स्वकालः। तेन तंत्रे व्यवस्थितं सर्वेषामुपकरोति। त्वगृह्यमाणविशेषत्वात्तंत्रं। यदाधाने कृते न तरं
किंचित्कर्मापतति तत्तदर्थमित्यानंतर्येण विशेषो गृह्यत इति चेत्। नायमाधानसमयेऽस्ति विशेषः। तदा
ह्येवमग्निसंधायास्ता वाधत्ते यदेव किंचिन्निमित्तवशात्कामवशाद्वा कर्तव्यं कर्मोपस्थाप्यते तदर्थमाधा
स्यग्नीनिति। ननु कंचिदेव कर्मविशेषमभिसंधायाधानं। एवमनभिसंहितकर्मविशेषेण सर्वोद्देशे
नाधाने कृते यद्यपि किंचित्कारणवशात्प्रथमं कर्मापतति तथापि न तादर्थ्यमेव भवति। प्रथमावस्था
यामेव सर्वार्थत्वावधारणात्। तस्मात्तंत्रं॥२॥ यूपपश्वाकर्मकालत्वात्॥ ज्योतिष्टोमेऽग्नीषोमीयपशौ

वुपदिष्टो यूपः सवनीयानुबंध्ययोस्त्वतिदिष्टः स किं त्रयाणामपि पशूनां तंत्रमुत प्रतिपशु भे-
देन यूप इति। तदर्थमिदं विचार्यते दीक्षासु यूपं छिनत्तीति किमग्नीषोमीययूपस्यापकर्ष उत
यूपा॰३ सर्वेषामिति। तत्र यथैवाध्वरकल्यायामाग्नेयस्यैवापकर्षणं। निर्वापस्य तथा यूपोप्याग्नेय एवाप-
कृष्यते। अग्नीषोमीयसंस्थायामतो सावपकृष्यते। छेदेन सवनीयादौ स्वकाले यूपसंग्रहः।
नैतदस्य विशेषेण सर्वयूपापकर्षणात्। न चेहाध्वरकल्यावद्युक्तमाग्नेयापकर्षणं। प्रधानका-
लबाधोत्र तथैवाप्राप्तचोदना। आग्नेयापकर्षणेप्यस्ति तस्मात्सर्वापकर्षणं। अध्वरकल्यायां हि प्र- २६
थमनिर्वापापकर्षे सति प्रधानकालाबाधो नियमविधानं च लभ्यत इति तस्यापकर्षः समाश्रितः।
अत्र त्वग्नीषोमीययूपापकर्षेप्यस्ति प्रधानकालबाधोप्राप्तविधिश्च। तस्मादविशेषात्सर्वयू-
पापकर्षे सत्यकर्मकोत्कर्षादग्रेसमाणाविशेषो यूपः सर्वेषां तंत्रं॥३॥ संस्कारास्त्वावर्तेरन्नर्थका-
लत्वात्॥ यूपस्य तंत्रत्वे तत्संस्काराणां तक्षणजोषणप्रोक्षणादीनां तंत्रत्वमावृत्तिर्वेति संदेहे छेद-
नमात्रस्यापकर्षविधानाज्जोषणादीनां चाग्नीषोमीयकालानां तदपवर्गे पवर्गात्सवनीयादौ पुनः ११
प्रयोग इति प्राप्ते ब्रूमः। तेषामप्यपकर्षः। दीक्षासु यूपं छिनत्तीति नायमर्थः यूपं संतं छिनत्तीति यूपस्य
प्रागसिद्धत्वात्। किं तर्हि छेदनेन यूपं कुर्यादिति। न च छेदनमात्रेणासौ कर्तुं शक्यते। न तक्षणादीनामपि यू-

मासारंभांगमियं न प्रयोगांगं दर्शपूर्णमासशब्देन प्रयोगानुक्तेः प्रथमप्रवृत्तिश्चारंभः स चैकस्य क्रतोरेक एव न तु बहु-
वः प्रयोगारंभास्तु भिंनाः न च तदंगमियं प्रयोगास्तु न साक्षाच्चांगं अंगिनः किंतु दर्शपूर्णमासारंभद्वारा तेन दर्शपूर्-
णमासारंभरूपांगग्रहे एव कृतानां सर्वे प्रयोगा अपेक्षंते न स्वारंभोहि कृतानां। अत एव बहिः प्रयोगाः क्रियमाणा यो सौ
दर्शपूर्णमासारंभः यस्मिंनारंभणीया कृता स सर्वप्रयोगसाधारण इति सकृदेव कार्या विकृतिषु तु आरंभभेदाद्
वर्तिंनेत्याशयः॥ ॥तत्रेति। मात्रशब्देनानिर्वापस्य स्व पं तो क्तो। मंत्राधिकरणन्यायेन मंत्रगतानां सर्वेषां पदानां दृष्टार्थत्व-
संभवेनिर्वापस्य प्रकाशनादृष्टार्थतायुक्तेसाशयेन पूर्वपक्षमाह तत्रेति। लक्षणयानामाह सवित्रेति। एवमपि निर्वापस्य ता-
विवाग्निपदेन मस्य साप्रकाशितस्याग्नेः पुनर्लक्षणा तत्रापि चानेकधानयाप्रकाशनस्यादृष्टार्थत्वाविशेषादपरितुष्यप-
क्षांतरमाह अग्निनेति। उत्पत्तिशिष्टेनाग्निना मांत्रवर्णिकस्य वैषम्याद्विकल्पायोगत्वाकांक्षानिरासाय मंत्रवर्णिकेनेति विपरि-
णतानुषंगेणाग्निर्विशेषणीयः सवित्रादिपदानामानर्थक्यस्यादृष्टार्थत्वस्य चापरिहाराय चत्वार इमे मंत्राः त्वा जुष्टं निर्व-
पामीति पदत्रयानुषंगेण देवस्य त्वा सवितुः प्रसवे त्वा जुष्टं निर्वपामि। अश्विनोर्बाहुभ्यां त्वा जुष्टं निर्वपामि। पूष्णो हस्ता-
भ्यां त्वा जुष्टं निर्वपामि। अग्नये त्वा जुष्टं निर्वपामीति। एतैर्मंत्रैर्निर्वापेपि कल्पितादेवतायागायेव सोमयष्टणोधिकेद्वा-
ग्याघाः। अत औत्पत्तिकाप्याग्नेयादितद्धितः सवित्रादिपदानर्थक्यादृष्टार्थत्वपरिहारायेव न देवताविधिरित्याशयः। प्रथमे-
व पूर्वपक्षः पारमार्थिक इति द्योतयितुमनुमेव पूर्वपक्षं पूर्वपक्षिणां तेउक्रमेणापि व्युत्क्रमेण प्रथमं दूषयन्सिद्धांतमाह उत्प-
त्ताविति। तद्धितार्थद्रव्यदेवतान्वयविध्यभावे। कल्पकाभावेन यागालाभाद्भूत्यर्थविशेषालाभश्च। चोनिरूपितभावनामा-
त्रविध्यपर्यवसानात्स्वार्थबोधे चापर्यवसितस्याग्नेयादिवाक्यस्य वाक्यांतरेण मंत्रेणान्वयायोगात्तद्धितस्यापि विधायक-
त्वेनवाच्या। तदुक्तमाग्नेयाधिकरणे। अतः [illegible] मांत्रवर्णिकस्य चाग्निनोत्पत्तिशिष्टेन तद्धितविहि-

उभयथा

तेनचैगुणाधिकरणोरूवैषम्यान्नविकल्पइतिभावः। दर्वीकापरितोषदरीसेवावापूर्वपक्षंनिरस्यति·नेति·द्वितीयपूर्वपक्षेवा
क्यभेदापत्तेरपिनानेकमंत्रतायुक्तेत्याहमंत्रेति·अननुषंगेणचससंगतानुषंगोप्यस्मिन्पक्षेनयुक्तोगौणीकर्तुंविशेषत
श्चानेकशब्दविषयइत्याहजुष्टेति·चशब्देनत्वाशब्दोपिसंगृहीतः। ऋग्वाक्यभेदानुषंगाद्युपगमश्चप्रतीतिबाधोपी
त्याहसर्वेश्वत्वेनिरवसरस्यनेकदोषपरिहारायवरंनिर्वापस्तुतेरदृष्टार्थतापि·तृस्तुतस्तोत्रस्यैवनेयंस्तुतिरदृ
ष्टार्थाकिंतुकर्मसमवेतार्थैकपदैकवाक्यत्वादर्थवादस्तुतिवददृष्टार्था·विधिनेवाहि(?)विधेयेमंत्रेणनिर्वापेप्रकाश्य
मवतिसिध्यर्थमपेक्षितायप्ररोचनानयास्तुत्याजन्यते·अनेनैवन्यायेनाग्निर्मूर्द्धेत्यादियाज्यानुवाक्यादावयमग्नि
तिदेवताप्रकाशनेदिवोमर्द्ध(?)इत्यादिस्तुत्यर्थतासिद्धिरित्याशयेनाहतस्मादिति·स्वयंगुणकीर्तनात्मिकास्तुतिरपिगुणिप्रकाश
नपरेतिदृष्टार्थेनाप्रकाशयंतीत्यनेनोक्ता·अर्थवादपदेविधानकालइवैतैःअनुष्ठानकाप्ररोचयितुंयाजप्रशंसातांव
त्तुमिति·तुमुनोरन्वयः॥ ॥कथंसमवेतेत्यग्नोअसमवेतवाच्याग्निशब्दइत्यतआहजुष्टमिति।जुषीप्रीतिसेवनयोरितिस्म
रणात्प्रीत्यार्थनिष्ठाबलाच्चसेवितंद्रव्यंनिर्वापकर्म·केनसेवितमित्यपेक्षायामग्निनेत्यर्थादवगम्यतेनचनिर्वापवेलायाम
ग्निनासेवितमस्तिपुरोडाशावस्थत्वस्यतेनसेवनात्·तेनयद्यस्मिन्कर्मणिसमवेतोग्निस्तथापियथाविधोनिर्वापेस्तु
तस्तथाविधोनसमवेतइतिअयमन्यएवाग्निर्निर्वापस्तुत्यर्थंजोषणकर्त्तात्वेननिर्वापस्तुत्यर्थंप्रसवादिविशेषणसवि
त्रादिवदित्यर्थः·ननुजुष्टशब्दस्यासमवेतत्वाग्निलोपिनतत्कर्तृत्वेनाग्निरन्वेतियेनतथाविधोसमवेतस्यात्संप्रदा
नत्वाच्चुनिर्वापक्रियायैवासावन्वेतीत्यआहतदिति·नैषासंप्रदानचतुर्थी।साहिददातियोगेस्यान्नचनिर्वापवे
लायांदानमस्ति·तस्मात्तादर्थ्यचतुर्थ्येषा [illegible] र्थः अग्न्यर्थंयदर्थात्तेनैवजुष्टंद्रव्यंतन्नि
र्वपामिइति·ततश्चासमवेतस्यनिर्वापस्तुत्यर्थस्यजुष्टस्याविशेषणमग्निरप्यसमवेतःसंप्रदानचतुर्थ्यालेति ११

तत्क्षणाद् अग्नीषोमीयकालतामेवांगीकृत्य द्वितीयव्याख्या भाष्यकृता तामाह अस्तु चेति। यूपोऽयं यत्र यूपत्वं ज निष्पद्यते तेन त्र्काष्ठं इत्यर्थः।

पे १ प्रहरणं विनाशः कल्पो योगाच्छकलात्क्षिप्तप्रहरणापेक्षं प्राथम्यमित्यर्थः ७

पलक्षितत्वात्। तस्माच्छेदनग्रहणमुपलक्षणं। छेदनादि शिर्ष्पं कुर्यात्। तस्मात्तेषामपकर्षात्तं त्रत्वं। अ
स्तु वा छेदनमात्रापकर्षः तावतैव यूपसिद्धेः। तथापि यूपस्तावत्स्वेषामर्थे नैक एवोपात्तस्तद्वारा च सं
स्काराः। ते यद्यप्यग्नीषोमीयकालेनुष्ठीयन्ते तथापि यूपद्वारत्वात्तस्य च साधारणत्वात्तेषामपि साधा
रण्यं। ४। स्वरुस्तंत्रापवर्गः स्यादस्य कालत्वात्॥ यूपस्य स्वरुं करोतीति स्वरुः किमेकयूपानां पशूनां तंत्र
मुत प्रतिपशु भिद्यत इति संदेहे। जनकाले स्योपादानात्तदपवर्गे पवर्गी दंडनां तरेण च शकलोपादानं यः
प्रथमः शकलः स स्वरुरिति चेकस्मिन्प्रहरणे यः प्रथम इति शास्त्रार्थः। तेनैकस्मिन्नपि यूपे प्रहरण ब
हुत्वात्संभवंति बहवः प्रथमशकलाः। नैवं प्रहरणस्यानुपात्तत्वात्। तेन शकलमात्रापेक्षं प्राथम्यमि
त्येकस्मिन्यूपे एक एव प्रथमः शकल इति तंत्रत्वं। यूपच्छेदनकाल एव चास्य व्यामोहनिरसनार्थं नाश
प्रहारपरिहारार्थं चोपादानं कर्त्तव्यमित्यग्रलमाणविशेषत्वादपि तंत्रं। ५। प्रहृतेर्विषाणप्रास
नं धर्मविप्रतिषेधादंते प्रथमे वाहनि विकल्पः स्यात्॥ ज्योतिष्टोमे श्रूयते कृष्णविषाणया कंडूय
त इति। तथा नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यतीति। द्विरात्रादिष्वहर्गणेषु संदिह्यते।
किं प्रथमेऽह्नि वा कृष्णविषाणाप्रासनमुतान्त्य एवेति। विकल्पः स्यात्। प्रकृतौ हि प्रासनोत्तरकालानांपदा
र्थानां पाणिकंडूयनं धर्मः। सर्वकालानां तु विषाणकंडूयनं। तद्यदि प्रथमेऽहनि प्रास्येत ततउत्तरेष्वह
स्तु प्राकृततन्मधुपोपादानमेवाप्रत्यक्षलततरेवं सर्वं स्वीकारस्य पत्वात्तु द्वितीयेत्यपात्तस्योपादानायोगात्कर्मप्रयासनि
करणं गौणं। द्वयोर्वोपादानशब्दः साधारणः आद्यमपि चद्वितीयेन दुजननेनैवाक्षिप्तः शास्त्रीयमेवेति तस्यैककालत्वापि
तंत्रता हेतुरित्याशयः। चकारः स्वरोरुक्तसर्वतासमुच्चिनोति उपादानं ग्रहणं ७

नन्वेवमपीह निप्रासने पाणिकण्डूयनं कथं वा बाध्येत सामान्यविज्ञानायां यच्छति तां सह विधृतावा वं ८
पाणिकण्डूयनसंभवादित्यत आह नहीति। नियमः कृष्णविषाणाकण्डूयनं
अतः कृष्णविषाणाकण्डूयनस्यावधिः प्राशनं शमिति प्रतिपत्तिविधेरर्थात् सिध्यतीत्यर्थः। अन्येह निप्राशने पाणिकण्डूयनं बाध्यत
स्तु चेदक्षिणनयनात्प्राग्भाविनः पदार्थास्तेषां विषाणकण्डूयनं धर्मो बाध्येत। नहि प्रास्तायाः पु मितीत्याप सा
नरुपादानं संभवति। त्यागात्मकं हि प्रासनं प्रकृतो विहितं। न च पुनरुपादित्समानस्य त्यागबु सिद्धान्तमाह
द्धिर्भवति। तस्माद्बाध्यत एव विषाणकण्डूयनं। अथ पुनरन्त्येऽङ्गिप्रास्यते ततः पूर्वेषु हः सुचे स्यादिति ६
12 दक्षिणानयनात्परस्तात्पदार्थास्तेषां पाणिकण्डूयनं बाध्येत। न ह्यप्रास्ताया तस्यां पाणिकण्डूयनं सं
तामभवति। अदृष्टार्थत्वापादकं अक्रान्तनियमत्यागे शिष्टाचारविरोधाच्च। अतः पक्षद्वयेऽप्यवश्यंभावी केषां
चिद्धर्मबाध इति विकल्पः। स्यादेवं यद्यन्त्येऽह निप्रासने धर्मबाधः स्यात्। न त्वेतदस्ति। पाणिकण्डूय
नं बीधोऽस्यार्थकृतत्वेनाशास्त्रीयत्वात्। तस्माद् दन्त्येऽह निप्रासनं॥ ६॥ वाग्विसर्गो हविष्कृता वीजे कालो मुसला
न्ते देते तथा स्यात्॥ दर्शपूर्णमासयोः श्रूतं प्रणीताः प्रणेष्यन्वाचं विसृजतीति। हविष्कृतेति च कालोप दानोर्ध्वकालः ६
लक्षणं। हविष्कृदाह्वानकाल इत्यर्थः। तत्र नाना बीजेषु चिन्त्यते। एकशाखिनां तरणादीनां फलीकर
अयमेक: णपर्यन्तानां अनुसमयः इत्युक्तं। तत्र किं प्रथमस्यान्त्यस्य वा बीजस्य हविष्कृताऽऽवाग्विसर्गः किमन्त्यस्ये
पदार्थः। ८ वेति। तत्र प्रथमं विसर्गे सत्युत्तरेषां बीजानां ये हविष्कृत्कालात् प्राचः पदार्था हविरासादनादयस्तेषां राम २
धर्मो बाध्येत। अन्तिमे तु विसर्गे पूर्वबीजानां ये हविष्कृतः प्रत्यंचः परावपनादयस्तेषां धर्मो वाग्वि
सर्गो बाध्येत। न त्वत्र पूर्ववद्वाग्विसर्गस्याशास्त्रार्थत्वं। विसृजतीति वचनात्। तस्मादवश्यं भावि
हविरावपनमुख्ये संदानरूपो ह्यवपदार्थो यद्यपि हविष्कृत्कालात् प्राचीनः तथापि बहूनां बीजानां बहून्यावपनानि बहूनि च मुसलादानानि इति बहुवच
नं। शूर्पादानस्य परावपनार्थत्वान्न देवोपादानं॥

कारकाणां क्रियान्वयाज्जुष्टमनाहृत्याग्निशब्दो निर्वापेणान्वितः स्वदेवताविशिष्टनिर्वापप्रकाशनात् समवेतवचनः स्यान्न
तु तदस्तीत्याशयः । उच्यत इति । यथैव ह्रदायवंगच्छतीत्यादिविधौ ग्रहणेन ह्रदायवं कुर्यादिति वचनव्यक्तिर्गुणेन चैव के
वलेनैव ह्रदो युदेवतस्य कर्तुमशक्यत्वे विपागसहितेन तु शक्यते कर्तुमित्यर्थः । एवमत्रमन्त्रेप्यग्नये देवतायै निर्वापेण
जुष्टं यथोक्तेनैव सेवितं करोमीति वचनव्यक्तौ यद्यपि केवलस्य निर्वापस्याग्निदेवसत्वमसंभवि केवलेन च निर्वपि
णाग्निजुष्टं न शक्यं कर्तुं तथापि यागसहितस्याग्निदेवसत्वं संभवति यागसहितेन च निर्वापेणाग्निजुष्टं शक्यते
तुं एवं वचनव्यक्तौ च स्वदेवताविशिष्टनिर्वापः प्रकाश्यमानो दृष्टार्थो भवति निर्वापमात्रे तु प्रकाश्यमाने साकांक्ष
स्यात्कस्यै देवतायै निरूप्तमित्यज्ञाना कारकविभक्तिश्रुत्योपपदविभक्तेर्बलीयसी त्याशयेनस्त्रोक्त्वा चष्टे नाय
मिति । जुष्टमिति निष्ठान्तभूतत्वं तु यस्मिन्काले जोषणं तदुत्तरकालापेक्षमित्याह यथेति । तस्मात्समवेतवचना
देव जुष्टाग्निशब्दाविस्याह तस्मादिति ॥ ॥ व्रीहीनवहन्ति ॥ धान्यं व्रीहिस्त्वबकरीतित्रिकाण्डीस्मरणात् तन्नावहन्त्यशब्दः कृतं तण्डु
लानिष्पत्तौ लक्षणात् आदृष्टकल्पनेनैव ज्यायसी । लक्षणाहि प्रमाणान्तरवशाद्भवति अदृष्टार्थतातु समाम्नानबलादेव सं
कल्प्येत्याशयः । ननु प्रयाजशेषन्यायविरोधः तत्रापि दृष्टकल्पनातो लक्षणैव ज्यायसी स्यात् । किंच प्रमाणान्तरवशाच्च लक्षणा त
तोऽत्रापि दृषदि तण्डुलानावपतीति विनियोगबलादेव लक्षणा स्यादिति उच्यते प्रयाजशेषस्याभिघार्यत्वमेव धारयितुं शक्यमे
कवाक्योपात्ततया तत्र विभक्तिमात्रे लक्षणादृष्टार्थता घु तण्डुलानामदृष्टकल्पनाह्न तु प्रातिपदिके लक्षणेन च केवलं कोपात्त
नादिकिञ्चिन्नियामकमस्तीयेन तण्डुला एव लक्ष्येरन् धान्यसंबंधितुषविकरणाद्यपि न स्वेवलक्षणायामपि च दृष्टार्थ
ता लभ्यत एवेति अत्र न लक्षणा युक्ता किं च दृष्टार्थतैवरायचतुर्थ्ये स्यादित आपि दृषन्मप्यप्रीमन्यते नेति करणो विनियोज
क एव भवति । अवहन्तीति वाचं विसृजतीति ततेनन्दृष्टद्यतिदृषदि तण्डुलानावपतीत्यत्रापि दृषदि

तंडुलाग्रायो धान्यमसीति मंत्रस्यादृष्टार्थस्यैव कालं लक्षयन्ति विपरीतं वेति । सिद्धांतमाह लक्षणयेति । अतंकरणुते स्याद्दै
लिंगेन मुख्येर्थे विनियोगान्न हलेन कालक्षणमान्यथानीतं वाक्यं न विनियोजकमिरूक्तं । इह त्वन्यत्राविनियुक्तो
मंत्रः प्रयोजनाय स्यात्कोसइति दृषदीति वाक्येन विनियोगान्नादृष्टार्थो युक्तः । विनियोगबलाद्देवचनतंडुला एव लक्ष्यं
ते धान्यशब्देन न तुषादिः स्यात्तस्मादिति । तरसेति । षट्त्रिंशत्संवत्सरे शाक्यानामयने श्रुतं संस्थिते संस्थिते तरसानि क
रुष्यतिर्ल्लंगयोयतिस्सतत्र यानूष्मगान्हूंतितेषां तरसाः सवनीयाः पुरोडाशा भवतीति तत्र यद्यपि वक्तो मांसस्या
भिधायिनाः स्यैवपुरुषणार्थं त्यात्तस्य मां सेच कार्यो भावेन पेषणबाधात्तत्राभिधायी भावेनैवतदंगं मंत्रोपि लुप्येत तथा
पि मांसस्याभिधायी स्त्रीति लक्ष्या विनयान् प्रयोजनमुक्तं ॥ ॥ वृद्धप्लुतं विना त्रमात्रि धीयत इति मात्रालक्षणपरिशिष्टे । ए
इ ऐ ई इस्लेतानि तालव्यानि इति पुष्पग्रंथे । प्रथमस्वर इति मध्यमस्वरसंज्ञा । अंगुष्ठस्योत्तमे क्रुष्ट अंगुष्ठे प्रथमस्वरः ।
प्रदेशिन्यां तु गांधार ऋषभस्तादनंतरं । अनामिकायां षड्जस्तु कनिष्ठायां तु धैवतः । तस्याधस्ताच्च योन्यस्तु
निषादं तत्र निर्दिशेदिति नारदशिक्षोक्तेः । क्रुष्टः पंचमः । एवं च सप्तति ऐरमिति तद्धितप्रकृते तेरैरपदस्य प्रगी
तत्वेन तदिकारस्य पुष्परव यज्ञायज्ञीयउ औ याघस्य हंनेति विधेर्दृष्टत्वात् तालव्यसंज्ञत्वाच्च ओ । क्विचको क्रुः आ
यीशावेसानि वृद्धा च्छ इस्याप घे तस्वर्यः ॥ ॥

12/2

दृ वाधानस्यधरावगणा अयो नदबाधादान॥

निषर्म बाधे विकल्पः। नैवं। न ह्यत्र विसर्गो विधीयते। वा विधेस्त्वयमनुविधिरुच्यते। तदेकवाक्यत्वा
त्। विसर्ग विधौ हि वाक्यभेदो दृष्ट कल्पना च स्यात्। प्राप्तस्त्व विसर्गो न विधातव्यः। तस्माद्विसर्ग
स्यानंगत्वाद विसृष्टायामपि न कश्चिद्धर्म बाधः कृत्यं तएव विसर्गः॥ ७॥ पशोर्वपुरोडाशे च समा
नतंत्रं भवेत्। पशावग्नीषोमीये पशुपुरोडाशः। तत्र तावदस्ति हविष्कृदाह्वानं। पशावस्तीति कृत्वा ५४
चिंत्यते। किं प्रथमे पशुकाले वाग्विसर्गः पुरोडाशकाले वेति। प्रासंगिकत्वात्पुरोडाशस्य पाशुके
नैव वाग्यमेकार्ये सिद्धेर्न वाग्यमेन कार्यं तस्मात्पशुकाले वाग्विसर्ग इति मन्वानस्योत्तरं। नवा
ग्यमो यमाद्युपकारकः कर्तृसंस्कारस्त्वसौ। अतो विसृष्टवाचा क्रियमाणाः पौरोडाशिका विगु
णाभवेयुः तस्मात्पुरोडाशकाले विसर्गः॥ ८॥ अग्नियोगः सोमकाले तदर्थत्वात्संस्कृतकर्मणः परेषु
सांगस्य तस्मात्सर्वापवर्गे विमोकः स्यात्॥ अग्नेरभ्यूयते। अग्निं युनज्मि शवसा घृतेनेति जुहोतिअ
ग्निमेवतद्युनक्ति पंचभिर्युनक्ति पांक्तो यज्ञ इत्यग्नियोगः। इमं स्तनमूर्जस्वंतं धया मीत्यास्यस्य सर्पिंग
स्तु चं जुहोत्येष वाग्नेर्विमोक इति। सोयमग्निविमोकः किं प्रधानमात्रापवर्गे स्यादुत सांगप्रधानाप
वर्ग इति। यदि प्रधानमात्रार्थो योगस्ततस्तदपवर्गे विमोकः सांगप्रधानार्थत्वेतु योगस्य सर्वांते
विमोकः। तत्राग्नेः सर्वार्थत्वात्तत्संस्कारो योगः सर्वार्थः तस्मात्सर्वापवर्गे विमोक इति एवं पक्षे कृत्वा पं

५८२

ननु योगस्य सर्वार्थत्वेऽग्न्यपवर्गेणैवापवर्गाख्याविमोकः स्यादित्यत आह तस्मादिति। न्यायेनतथैव
प्राप्तवचनाद् अग्न्यनपवर्गेप्याकृतिरेवापवर्गत्वेन विधीयत इति भावः ९

पां कइति। सर्वो यों ऽग्निसंस्कारार्थत्वेन न्यायात् सर्वार्थत्वे प्राप्ते प्रधानवाचियज्ञशब्दसंयोगात् प्रधानमात्रार्थत्ववचनाद्दीक्षाः सोमदक्षिणाः
मस्येतिवत्तूत्सर्गः।१ यदा त्वनेन न्यायेन प्रधानमात्रार्थं सौमिकवरणं तदा तेनावभृथार्थायां आनन्तरसिद्धस्तद्दर्शदार्शिकेऽपि वरणांऽपि मार्थ

13

कोयज्ञ इति वाक्यशेषेण यज्ञार्थतायोगस्य। अतः प्रधानापवर्गे विमोक इति न्यायप्रकारेण सि
सिद्धांतितं। एवं च सौमिकमपि वरणं यदर्तावपक्षकुर्युः आर्त्विज्यमेव यज्ञस्याशीर्गल्हेदिति यज्ञसंयो
गादग्नियोगतुल्यन्यायं केवलप्रधानार्थं भवति। तत्रावभृथे सौमिकेन वरणेनाप्रस्ताम्नातं होत
वरणं प्राप्नोति। तत्र न होतारं वृणीत इति प्रतिषेधो वक्तृत्वो भवति। इतरथा सौमिकस्य वरणस्य सां
गप्रधानार्थत्वादवभृथे पृथग्वरणप्राप्त्यभावान्न निषेधो नस्यादिति च लिंगदर्शनमुक्तं। तथा हर
हर्युनक्ति अहरहर्विमुंचतीति योगविमोकदर्शी न द्वादशाहे तथा सांगप्रधानार्थत्वे आद्यंतयोरेव इत्यध
योगविमोकदर्शीनं स्यादिति। ननु प्रधानार्थत्वेपि वरणस्याप्राप्तिरपूर्वत्वादवभृथस्य। तत्र कश्चि
दाह। अपूर्वताया एवायमर्थवादो होतृवरणाभावे त्राघवं स्यादिति। स च पूर्वत्वपक्षे वरणाप्रा
प्तौ सत्यामवकल्पते नान्यथेति। वयं तु ब्रूमः। यद्यप्यपूर्वोवभृथस्तथाप्यात्मनागयोस्तज्जसत्वाद्धो
तुश्चांगप्रधानार्थत्वात् तद्वरणमप्यंगप्रधानार्थं नहि दार्शिकं वरणं केवलप्रधानार्थं। यज्ञसंयोगाभावा र्नार्थ
त्। अतो ऽसत्यप्यतिदेशे होतृवरणस्याज्यभागार्थतयास्त्येवावभृथे प्राप्तिरिति युक्तः प्रतिषेध राम
इति। तदिदं भाष्यकारीयमधिकरणव्याख्यानमनुपपन्नमिति मत्वा वार्त्तिककारेण विपर्ययेण २३
पूर्वो [illegible] वाक्यशेषादवभृथलिंगाच्च केवलप्रधानार्थो योग इति पूर्वः पक्षः।
X त्तरपक्षौ वर्णितौ।१

वानुवादेनवामंत्र मात्रविधिः आद्येवाक्यभेदः क्रियायां मंत्रस्य मंत्रे च स्वरस्य विधानात्। नं चारुणैकहायनी न्यायः। स्वरस्य
शब्दत्वात्। द्वितीयेपि स्वरस्याशब्दत्वादेवनविधिः। न च समाम्नायस्वरोप्य शाब्दः। तस्यैवोपात्तिकत्वेनानुपूर्व्या वन्नूतस्वरवि
शिष्टस्यैवमंत्रत्वात् स्वाध्यायवत् इतरस्यतु मंत्रत्वानंतर्गतेरित्याशयः। ब्राह्मणस्वरोपयोगमाह स्वरांतरेति॥ ।विशिष्ट
विनियोगाद्धि विशिष्टोत्पत्तिः कल्प्येत। न चात्र विशिष्टविनियोगः स्वरस्याशाब्दत्वान्न च ब्राह्मणस्वरोनर्थकः। पूर्ववत्स्वर
चस्वरा निच्छेदार्थत्वात् तत्तत्स्थानियतस्वरकाणि नानुपूर्वीकाणि यानि लोकिकानि अन्येकानिवाक्यानि लौकिकानि ते
षामिदमेवेति नियम्यत इत्याशयः। नैवमिति। मंत्रविनियोगो मंत्रस्वरूपस्य दृष्टादिनष्टो कल्पो नवगतेस्तडुस... त्तिमपेक्ष
तेसाचाधापित्वाकल्प्यमाना विनिगमकाभावात् आनुपूर्वीविशेषविशिष्टस्येन स्वरविशेषविशिष्टस्यैवकल्प्येत
यथोत्पन्नस्येव चविनियोगात् अशाब्दत्वेन स्वातंत्र्येण स्वरविनियोगासंभवेपि मंत्रत्वानुप्रवृत्तत्वेन न स्वरविधिः सिद्ध
इतिभावः॥ ॥गतश्रीत्येनिमित्ते विहितधारणं आहवनीयस्य संस्कारकर्मउताथकर्मेति। संस्कारकर्मत्वे नित्योस्याहवनीयस्थो
नापत्तेः काम्यो स्याग्नेर्नोद्धर्मो गतश्रीधारणं कर्त्र्यमर्थकर्मत्वेनेति। तदिमौ संशयोस्पष्टत्वादनुक्त्वा पूर्वपक्षमाह सोयमि
ति। आहवनीयशब्दवाच्य आहवनीयस्थानापन्न इत्यर्थः। आहूयतेस्मिन्निति च स्थानापन्नोहुत्येनदृष्टाधिकरणसिद्धांतेहोम
साधनत्वमुक्तं। एवं होमसाधनत्वेपि काम्याग्नेर्यदि गतश्रीधारणं नित्योस्याहवनीयसंस्कारः स्यात्तदा तत्स्थानापन्ने काम्या
ग्नोस्यान्नोन्यथेति गतश्रीधारणं नित्योस्याहवनीयसंस्कार इत्याह तस्मादिति। स्वाध्यायो ध्येतव्यइतिवत्कर्मार्थेन यावैगत
श्रिय आहवनीय इति कर्त्रत्ययेनाहवनीयसंस्कारकता वगम्यते। अतः काम्याग्नौ नित्यसाग्निसंस्कारो गतश्रीधारणं स्थाना
पन्नस्यापि यथा स्युदयेष्टौ प्रपणार्थयोर्दधिपयसोः प्रणीताधर्मा इत्याशयः। मैवमिति। आहवनीयशब्दो यौगिकत्वेन तावत्तत्वे १२
वानलिमितमित्यर्थः यत्राहवनीयस्थानापन्न... निरासमाभिप्रेत्याह तस्मादिति। अपिच
वेः। न चारणमाहवनीयसंस्कारः धार्योगतश्रीयइत्यस्यानोन्यथा...

...न तावदध्ययनमर्थकर्मभवदेवमतद्वस्तुतस्त्वाध्यायस्य कर्मत्वात्यागेनैवार्थकर्मत्वस्य तत्तोयेउत्पत्तौ तु वक्ष्यते रिसत्रोक्त
...। किंतु संस्कारकर्म। तच्च नाधानवदध्ययनं येनादृष्टार्थता याधर्मान्तरतोयात् किंत्ववाप्तिरूपदृष्टार्थं। न चैतत्र पर्वनिषेधा
...दृष्टार्थस्य धर्मस्योपयोगोस्ति। न नन्वध्ययनविधेर्नियमविधित्वान्नियमापूर्वं धर्मस्योपयोगः स्यात्। यथा चयनाधानादि
...र्थानामप्यंगानां चयनजन्यनियमापूर्वीन। अध्ययने नियमविध्यसंभवस्याध स्तादेनिहितत्वात्। अत आनर्थक्येना
...यने प्रकरणेन विनियोगायोगात्तत्तु लुप्यते स्याध्येतव्यमित्युच्चारणमात्रमनध्यायपर्वणि नेत्यादि धर्मो विहितो यत्र वार्थ
...त्तत्रैव प्रवर्तते न लौकिकद्वाध्ययने ग्रहणाध्ययने वा स्वाध्यायः तत्रापीत्यपि शब्दो ध्येतव्यमित्यस्य स्वरूपोच्चारणमात्र
परतो च्चार्थः सिद्धीतमाहनेवमिति। सर्वत्र स्वरूपे कार्ये वा प्रयोगिनोंगवेपि पर्वनिषेधादेश्चोक्तरीत्याकार्यानुपपत्ते
धिस्वरूपोपकारितेव नक्षिप्यति। सर्वस्य कर्मणो निर्विघ्नसमाप्त्यपेक्षणात्तदर्थतायाएव कल्पनात्। अमावास्या गुरुरिति। १२
शिष्य इति चतुर्दशीसाहित्य मते स्थेति भावः। पादाध्यायसंगतो आह पूर्वपक्षेति॥ ॥ वाचनिकेति। येतावल्लिंगविनियोज्या
...षां पुनर्विध्ययोग स्वरपर एव विधिः। ये वचनाविनियोज्यास्ते स्वरविशिष्टा एव विधेयाः सस्वरकर्मवणात्। मंत्रसमाम्नाय
स्वरस्य तु न विधिरस्ति सरिमंत्रोच्चारणांगमेवोच्चारणे च वेदस्वरेणैव कृतमिति प्रसंगसिद्धः समाम्नायस्वरेणानेकयोगे।
न चास्तावपि निर्विषयः स्यात्प्राप्तोध्येतव्य इति विध्यो सस्वरके स्वाध्यायपाठे चाविध्यन्तावात्तत्र समाम्नायस्वरनियमात्
...स्यकृपाकृत्यनुस्वारमहरतिरित्यादिष्वपि स्वरूपनाकपदेन विध्यानात् कश्चिच्च स्वरूपप्रयोगसादिवदर्थसंदेहनिवृत्त्यर्थस्या
दिसाशायः सैवमिति। लिंगविनियुक्तेषु पुनः स्मृतेः प्रयोगत्वनायमनुक्ते मंत्राधिकरणे। तत्रार्थवादाद्यर्थैतावागो येनविधेयस्य
...केन मंत्रः अतस्तद्विशेषणत्वेन तावत्स्वरो न विधेयः नापि स्यात् त्रोण स्वरस्याशाब्दत्वात्। यदि सेव्यायात्तु वाक्यभेदापि।
यत्तु तीर्थ चतुर्भिरादत्त इति संख्यारूपगुणार्थतादिस्वरूपरूपयणार्थचमुक्ते तदपि स्वरस्याशाब्दत्वादेवायुक्तं। वचनविनि
योज्येष्वाह्वयपीति। तत्रापि प्रयोगगतिः मंत्रोविशिष्टक्रियाविधिः ...

त्याने ति। न केवलं यह संमार्ष्टिं पशुना यजेते त्यादि विधाविवरकत्वनि न क्षा वि न क्षा दि चिंतेति नियमः। किं तु मंत्रे पि न वर्षे ऊ हान्हहस्सि ध्ये हू चि दि क त्यादि ति
वक्षाक चिंतेस्फुटः। तत्र पशवः समाना विधा ताइ ति कृत्या चिंतायां प्रसक्ते हीतो लिंगविवक्षोक्ता। पत्नीसन्नहने सिच्च कत्वा विवक्षेति। तत्र पत्नीसंनिकरणे एकप
(लो) के प्रयोगे समवेतासि धा चि त्य संभवान्ते कवचनमन्या ध्यनिगदमिति तत्रोक्तः पूर्वपक्षन्यायो त्रास्ति। यच्चेतद्दृष्ट १० शिष्टशेषपत्रे

सिद्धांतस्फुटः। अग्नेः सर्वार्थत्वात्तद्योगो पि सर्वार्थः। नच वाक्यशेषवशाद्विशेषः। योगोत्पत्ति विधौ वाक्यशेषा
भावात्। तत्र तावत्सर्वार्थत्वं गम्यते। [illegible] पंचसंख्यागुणविधौ वाक्यशेषः श्रुतः। न चासावुत्प
त्तिवाक्यावगतं सर्वार्थत्वमलं निवर्तयितुं। किं च यत्तु शब्दो यागमात्रं ब्रवीति न प्रधानयागमेव। अतो नत
द्वशात्केवलप्रधानार्थत्वं। अवभृथे च होत्हवरणप्रतिषेधोंगप्रधानार्थत्वेपि सोमिकस्यवरणस्य घट
त एव। सोमिकं वरणमानत्यर्थं प्रकृतं तु होत्हवरणं प्रवृत्ते होतरि क्रियमाणमदृष्टार्थं। अतस्तत्सर्वार्थ
सोमेष्टिषु कार्यमिति द्वादशे वक्ष्यति। तस्माद्युक्तः प्रतिषेधः। द्वादशाहे च प्रत्यहं योगविमोकदर्शनमस्मिन्नेव
पक्षे घटते। विधानार्थत्वे तद्वचनेनानुवादमात्रं। अानर्थक्यात्। तेन सर्वोदोसर्वांते च सकृद्योगविमोक
यो न्यो यतः प्राप्तयोर्वचनेनाहं योगविमोको विधीयते। तस्मात्सर्वार्थो योगः सर्वापवर्गे विमोकः। स्त
आ णि तु तंत्र रत्ने एव व्याख्याता नो ति नेह व्याख्यायंते। ९॥ सुब्रह्मण्यापानुतं त्रं दीक्षावदन्यकालत्वात्॥
ज्योतिष्टोमे सुत्युपसत्कालं सुब्रह्मण्याह्वानं तदहर्गलेषु निघते नवेति। प्रधानत्वेदाद्भेदः। अकर्मकालत्वा
नुतंत्रं। न हीदं प्रधानकालं। उपसत्कालं तु सकृदनुष्ठितमेव सर्वेषामुपकरोतीति तंत्रं। १०॥ तत्कालत्वा
त्तु प्रयोगतो विशेषसंयोगात्॥ सुत्याकालमावाह्वानं तंत्रमावापो वेति संदेहे प्रथमसुत्याकाल एव
कृतं सर्वसुत्यानामुपकारकं संत्यक्तस्य सन्निधिविशेषे प्रपाकृतिवदिति प्राप्त उच्यते। कर्मकालं ह्येतत्।
साधारण्ये प्रथमसुत्यासंनिधिमनादृत्य द्वाह्वानं तत्र तासु नरान्याय्यमाशयः। कर्मेति। अग्नीषोमीयादिषु पदी ह्वा सुप
पं छिन तीति वा च निका तंत्रेणोपक्र[illegible] नादृत्य तत्रतोक्त। प्रपाकृतावपि तेषु प्रयोजकेस
मानदेशकालेकर्तृकेतरेतरयोः सतोरपि देशक्य नास्ती यादृशं क्यतत्समर्थित्वं हेतु। किंत्वकालचोत्रे कथंचिदेककाल
त्वं समर्थयितुं शक्यमिति साशयः। १

यस्य कर्मणः काले कृतं तदर्थमिति विशेषग्रहणात् तदपवर्गेण कृतस्य देवतासंस्कारस्यापवर्गादिहेदं
रंतरे पुनः कर्तव्यः। तस्मान्न तंत्रं॥११॥ लौकिकेषु तु यथाकामी संस्कारानर्थलोपात्स्यात्॥ समानदि
देशानामृत्विजां स्रुवादीनां च पात्राणां किं प्रयोगे प्रयोगे न्येषामुपादानमुत तेषामन्येषां वेत्यनिय
म इति संदेहे निर्दिष्टिकोपादाने शिष्टाचारविरोधादन्येषामेवोपादानं। नात्र शिष्टाचारविरोधः
।एतेषु शिष्टा न पुनरुपादानं वर्जयंतीति तस्मादनियम इति। अवसितमृत्विक्षु देशे च। पात्रेषु तु चिंत्य
ते॥१२॥ यज्ञायुधानि धार्येरन् प्रतिपत्तिविधानादृजीषवत्॥ पात्रेषु तु किं देशादिवदनियम उत तेषा
मेवांतावद्धारणमिति नियामकस्याभावादनियमः। न हि पूर्वप्रयोगकृतः कश्चित्संस्कारः परेष्वपजी
य६ वनीयोस्ति ल्लोपादीनताः पात्रांतराणि नोपाददीमहि। नन्वाहिताग्निमग्निभिर्दहंतीति यज्ञपात्रै
श्चेति परिधानीये कर्मणि पात्राणां प्रतिपत्तिर्विहिता तत्परित्यागे लुप्येत अतस्तेषामेव धारणं नियं पात्रा
णां प्रतिपत्तिः यजमानशरीरसंस्कारार्थे दाहे पात्राणां तृतीयया गुणत्वावगमात्। तेन परित्यज्यापि
पूर्वोपात्तानि पात्राण्यन्यैर्वैः परिदह्यमाने नास्ति किंचिद्वैगुण्यं। तस्मादनियमः। सिद्धांतैकदेशी त्वाह।
यद्यपि गुणत्वात्पात्राणां तथापि धारणं परित्यागे सति मरणे नियतत्वात्कदाचित्पूर्वप्रयोगोपयुक्ते राम २४
षु परित्यक्तेषु उत्तरप्रयोगकालेऽनागते यजमानः प्रमीयेत तत्र यज्ञपात्राभावाद्विगुणो दाहः स्यात्। तस्मा

ऋचां तु लिंगक्रम प्रकरणैः स्तोत्रांगत्वमपि स्वीक्रियत एव अन्यथा स्तोत्रस्थाने शाकाकूपा सिद्धेः यथोपदेशावगत प्रकृ संग भा
वानामपि प्रयाजादीनां विकृत्या कांक्षया तदंगत्वमपि दुर्बलं नाप्यतिदेशेनैवाभिहापि इत्याशयः ननु एवं यज्ञायज्ञीयेन
स्तु वीतेति साम्नो यंक मेव स्तुतेनाकथं श्रौतो विनियोग इत्यत आह कल्पिते आरादुपकारकस्यापि करणाच विवक्षया
श्रौतो विनियोगो बृहद्रथन्तरस्यैव नावश्यमिति इत्याशयः सिद्धान्तमाह श्रेष्ठ यज्ञा मित्यादुक्ते यज्ञायज्ञीयमितिसप्तमी श्रुत्या
ऋचः साम्नि विनियोजिकया साम्नो ऋचि विनियोजकं लिंगं बाध्यते इति तत्र प्रयाजशेषन्यायेनाभिघारणे वैसाम्यं
शायेत्याप प्रयाजशेषेण हवींषीतिवत् तीयया द्वितीययापि एव ऋचि साम्नि सप्तमी द्वितीययोरपि योगेन सामान्या ऋचेः
स्तुयादि निवाकर्मीय विनियोगांगीकारात् वस्तुतस्तु स्तोत्रेषु क्रमेण च विनियोगा स्यैवे स्याह अपि चेति उपदेशेन प्रयाजव
तु स्तोत्राणामवांतर प्रकरणमप्यस्तीति तस्याप्युपलक्षणार्थ कमाचि नन ऋतस्कारार्थतया साम्नो विनियोगो ना
नुपपन्न इत्याह तस्मादिति एवं च सातिशास्त्रादौ निरूपितत्वात् ध्ययनविधयश्चैतोवकर्मकालप्रयोगापृथ्वानि तेन्या
याक्षेपेणा प्ययुक्त इत्याह यदिति ॥ ॥ एकस्मिन् साम्नि साध्य वर्णे विधेयेन सामांगत्वं संभवेन्नवेति संशये न तथा यज्ञायज्ञीयं गायतिलक्
चरयोगीयत्वे ग्राम्यगेयमिति संशयेन प्रस्तुतेनुरन्य संशये हेतुं शयमाह तद्यमिति सामनिवृत्तिः सामकर्मिकाभावना नन्
यज्ञायज्ञीयमित्यत्र तिदेशेन यज्ञायज्ञीयस्य गानानुवादावगतस्याहिरोधे कथं पयासं गनाशंकस्याशीय नेदमतिदेशाक यो नोहस्तर
स्य ज्ञापकाभावात् अनोयदा तथ्या याव हि रित्यत्र यथैव बहि रातिध्यापसद गतीषोमीयेष्विति वा व्यार्थे तथात्रापि योन्या
दितिस्तुवंत सामेति ॥ द्वयोः स्तोत्र विशेषाय तत्र विधि तत्सामोगात्रित्यभावादुत्तरानियममात्रमिति तत्रेति प्राधा
न्येनसामैव त्रिचविशेषाश्रयेणा तेनान्वयाह स्तोत्रमुपसर्जनं यादृशं सामानिर्वृत्तिरिसंनेन स्तुचितेन नचैवं सा

म एव त्रित्वस्याव एकशब्द विरोधाद्वाभ्यासेनस्यादिति नव्यगुम्वयस्तास्यप्राप्तोयेनान्वयेनतस्यापिलविधोनाक्य
केदइत्याशीकय समानपदोपादानादुभ्यस्वपिन्नैवतदनुगतंनानुशामेनसामांगतयाविधीयतइति
न्यग्गतमित्सनेनोक्तं। ननुयागांगपरिछेदेनप्रत्येकयादियोगसाधनत्वात्सामान्येन[illegible]सामर्थ्यपरिछिद्यतेत्रसंक
र्थंसा। मोंगस्यादित्यतआहप्रधानेनेति। अभ्युदयश्रेयसोप्राणीनाधर्मः। अप्रधानस्य प्रधानद्वारापिअपणांगमनं
गस्याप्युपकारित्वात्तस्यद्वारत्वोपपत्तेरिति वक्ष्यते तद्वद्यापीत्यर्थः। सिद्धांतमाहसोच्चोयस्येति। तथापिहिसामान
सामर्थ्येनोदेश्यतां किंतु सोचीपत्वेन सोत्रीयत्वं च सोत्रस्याधनत्वं कस्त्वीरव स्तैवस्तोत्रस। धनेचअस्प्रत्येक
मेवएकैकयैवसस्कृतिदुधकुपनिदर्शनान्। तेश्चैकैकांसेतिप्रतिकस्तस्यसामाम्नौगचादेमे। कस्कृतिसाधनेभूता
यामेकैकस्यामृचिदृत्तस्तामुगायमिति सामविनियोजक विध्यर्थः स्तोत्रीयस्वेदनान्वयतो। अतसोत्रीय
शब्दान्वितार्थप्रधानवाक्यविरुद्धव्यासत्युगानार्थंक्रियत्वाधिपिः सामोद्देश्यानाधुकृत्स्नपरस्त्रीनीयस्तेन
स्तोत्रैएवकृत्स्नत्वमेगविधीयतइत्याहएवं चेति तत्श्यसोत्रीगस्यैवत्रित्वस्यसोत्रांगत्वगतेनसाम्नासं
बंधोर्थसिद्धोगत्वाभाव प्यवयते [illegible] कृत्स्नस्कारकचोद्धप्रसज्यमस्यासः आहएतान्यपतेक्रियत इत्यने
नानुवादत्वलक्षणोनदोषइत्याह तद्विधानेनेति। एवं चयथोन्यौतदुत्तरयोरप्युत्तरयोरित्यादौ सामा
एवातिदेशादृहसिद्धरूपोघातनायुक्तोतिस्पष्टत्वात्मोक्तं॥

एकाग्नित्वान्मुख्यजघन्यविरोधे चयथा वार्त्रघ्नीवृधन्वत्यनन्तरमंत्ररूपगुणानुरोधेन नाज्यभागरूपप्रधानावृत्तिस्तथा
त्रगुणानुरोधेन नावृत्तिरुत्तकर्त्तृरूपगुणानुरोधेनावृत्तिरेवेति देशभेदरूपप्रपूर्वाधिकरणन्यायात्॥ नो वा द्रूसोऽल्पविरोध
न्यायेन चाध्वर्युर्णैवाष्टानां हविषां सामुण्यायपत्नीसंयाजाः क्रियेरन्निति पूर्वपक्षमाह नो वेति। सिद्धान्तमाह असत्त्वेति। अ
यं भावः। यदि देशभेदात्प्रयोगभेदे सति किं कुत्र सा काङ्क्षायां कर्तृभेदत्वे न तु तीय त्रदेशभेदः तत्रैव कर्तृभेदः स्यात् एके
नैवानुवाक्येन द्वावपि कर्तृदेशभेदो अन्योन्यनिरपेक्षौ मा कृत्स्नाविहितौ तत्र देशभेदपूर्वकः कर्तृभेद इति न प्रमाण
मस्ति विपरीतस्यापि संभवात्। शाकं द्विवक्तुं कर्तृभेदाद्देवापेक्षितदेशान्तरे तद्विधिरिति। एवं च सति नार्त्रघ्न्यादिमं
त्रस्य प्रयोगानंगत्वान् न प्रयोगभेदापेक्षः। कर्त्रानुप्रयोगांगत्वात्तदापेक्षक इति देशभेदेनैव प्रयोगभेदः कर्तृभे ८
देन प्रधानस्याप्यावृत्तिरेवेति न योऽल्पविरोधन्यायबाधः॥ ॥ साष्टं पात्नीवतमालभेत। पर्यग्निकृतं पात्नीवतमु
त्सृजति। आज्येन शेषं संस्थापयतीत्यनन्तरवाक्यगतपात्नीवतपदानुषंगो युक्तः॥ वैश्वदेवीं कृत्वा प्राजापत्येश्चर
ति। तान्पर्यग्निकृतानुत्सृजति। ब्रह्मसाम्न्यालभत इत्यत्र सर्गवाक्यव्यवधानान्न प्राजापत्यपदानुषंगो युक्त इति म
